संस्कृत वार्ता:

दिनाङ्क : 05/03/2026 सायम् - 06:20

## आदौ मुख्यवार्ता:

· भारत-फिन्लेण्ड-देशौ अद्य नवदिल्ल्यां विभिन्नविषयेषु विभिन्नसन्धेः आदानप्रदानम् अकुरूताम् ।

· प्रधानमन्त्री मोदी अब्रवीत् यत्, भारत-फिन्लेण्ड्-देशयोः सर्वसम्मतिः अस्ति यत् केवलं सैन्य-संघर्षेन कस्यापि समस्यायाः निराकरणं न शक्यते इति।

· बिहारस्य मुख्यमन्त्री नितीशकुमारः अद्य राज्यसभानिर्वाचनार्थं नामाङ्कनं कृतवान्।

· नेपालदेशे निर्वाचनं शान्तिपूर्वकं सुसम्पन्नम्।

· अबू-धाबी-इत्यत्र भारतीय-दूतावासेन भारतीय-नागरिकेभ्य: पश्चिमेशियायां प्रचल्यमाणं संघर्षम् अभिलक्ष्य सतर्कतायै सुरक्षानिर्देशाणां पलनाय च परामर्शो प्रदत्तः।

· आई. सी. सी पुरुषाणां टी-20 विश्वकप्-स्पर्धामालिकायां अद्य सायङ्काले मुम्बई-नगरस्य वानखेडे-क्रीडाङ्गणे द्वितीय-उपान्त्यस्पर्धायां भारतं इङ्ग्लैण्ड्-देशेन सह स्पर्धिष्यते।

## प्रधानमन्त्री-फिन्लेण्ड् राष्ट्रपतिः

भारत-फिन्लेण्ड-देशौ अद्य नवदिल्ल्यां पर्यावरण-सहकारः, प्रवास-सञ्चार-सहभागित्वम्, सांख्यिकी इत्यादिषु विभिन्नक्षेत्रेषु विभिन्नसन्धेः आदानप्रदानम् अकुरूताम् । प्रधानमन्त्री नरेन्द्रमोदी अद्य फिन्लेण्ड्-देशस्य राष्ट्रपतिना अलेक्ज़ाण्डर स्टब इत्यनेन सह विविधक्षेत्रेषु द्विपाक्षिकसहयोगं सुदृढं कर्तुं चर्चां विहितवान्। तौ बहुपाक्षिक-मञ्चेषु सहकार्यं समेत्य परस्पर-हितस्य क्षेत्रीय-वैश्विक-विषयेषु अपि विचाराणाम् आदानप्रदानम् अकुरूताम्। स्वस्य संयुक्त-वक्तव्ये प्रधानमन्त्रिणा मोदिना प्रोदीरितं यत् अद्य विश्वं अस्थिरतायाः अनिश्चिततायाः च क्षणे अस्ति । सः अवदत् यत्, युक्रेन्-देशात् पश्चिम-एशिया-पर्यन्तं, विश्वस्य अनेकेषु प्रदेशेषु अविरतं संघर्षाः प्रचलन्ति।

प्रधानमन्त्री मोदी अब्रवीत् यत्, भारत-फिन्लेण्ड्-देशयोः सर्वसम्मतिः अस्ति यत् केवलं सैन्य-संघर्षेन कस्यापि समस्यायाः निराकरणं न कर्तुं शक्यते।

श्री मोदी वर्यः अवदत् यत्, षडविंशत्युत्तर द्विसहस्र तमवर्षस्य आरम्भे ऐतिहासिकः भारत-यूरोपीयसङ्घ-मुक्तव्यापारसमन्वयः हस्ताक्षरितं गतः । सः अवदत् यत्, इयं सन्धिः निष्चप्रचं भारत-फिन्लेण्ड्-देशयोः मध्ये व्यापारम्, निवेशं, प्रौद्योगिकीयसहयोगं च इतोऽपि सुदृढं करिष्यति ।

अवधेयं यत् फिन्लेण्ड-देशस्य राष्ट्रपतिः भारतस्य चतुर्दिवसीय यात्रायै ह्यः नवदिल्लीं समागतवान् ।

## विदेशमन्त्री

विदेशमन्त्री डा. एस्. जलशङ्करः अद्य नवदिल्ल्यां फिनलैण्ड्-देशस्य राष्ट्रपतिं एलेक्ज़ैण्डर् स्टब् इत्येतं मिलितवान्। सामाजिकजनसंचारपटले डा. जयशङ्करः दृढविश्वासं प्रकटितवान् यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना सह फिनलैण्ड्-देशस्य राष्ट्रपतेः मेलनेन भारत- फिनलैण्ड्-देशयोः सम्बन्धः इतोऽपि सुदृढो भविष्यति इति।

## नीतीश-राज्यसभा

बिहारस्य मुख्यमन्त्री अथ च जे. डी. (यू) अध्यक्षः नितीशकुमारः अद्य राज्यसभानिर्वाचनार्थं नामाङ्कनं कृतवान्। नामाङ्कनमिदं पटनायां बिहार-विधानसभायां सचिवस्य समक्षं कृतम्। केन्द्रीय-गृह-मन्त्री अमितशाहः, भाजपेतिदलस्य राष्ट्रिय-अध्यक्षः नितिन नबीनः, बिहारस्य उपमुख्यमन्त्री सम्राट् चौधरी, विजय सिन्हा इत्यादयः वयोवृद्ध-नेतारः उपस्थिताः आसन्। श्री-कुमारः पूर्वमेव अघोषयत् यत् सः आगामि राज्यसभायाः निर्वाचने भागं ग्रहीष्यति इति, येन बिहारस्य प्रमुखः राजनीतिको विकासो भवेत्। सामाजिकान्तर्जालीय माध्यमे श्री-कुमारः अवदत् यत् बिहार-विधानमण्डलस्य उभयसदनानां अपि च संसदः उभयसदनानां सदस्यः भवितुम् तस्य अभिलाषा आसीत् । बिहारस्य जनैः सह तस्य सम्बन्धः इत्थमेव भविष्यति, नूतनसर्वकारस्य पूर्णसमर्थनं मार्गनिर्देशं च करिष्यति इति सः आश्वासितवान् ।

## नेपालदेशे निर्वाचनं

नेपाले मतदानम् आधिकारिकरूपेण सायं पंचवादने समाप्तम्। प्रात: सप्तवादनात् शांतिपूर्णरीत्या मतदानं सम्पन्नम्। अस्माकं वार्ताहरै: संसूचितं यत् प्रात: एकादशवादनं यावदेव ऊनविंशतिलक्ष मतदानं अजायत। सुदृढा सुरक्षा व्यवस्था मतदानावधौ आसीत्।

## अबुधाबी-परामर्श:

अबुधाबी-नगरे भारतीय-दूतावासेन यु. ए. ई. इत्यत्र स्थिताः सर्वे भारतीयाः नागरिकाः जागरूकाः, शान्ताः भवेयुः, यु. ए. ई. अधिकारिणां सुरक्षा-निर्देशान् पालयेयुः, पश्चिम-एशियायाः द्वन्द्वस्य परिप्रेक्ष्ये आधिकारिक-उपदेशान् पालनाय च आदेशः प्रदत्तः अस्ति। परामर्शे उक्तं यत् असाधारण-परिस्थितिं दृष्ट्वा वायुक्षेत्रं, नियमित-निर्धारित-विमानप्रचालनं च अस्थायीरूपेण स्थगितम् अस्ति। दूतावासेन उक्तं यत्संकटे स्थिताः भारतीयाः नागरिकाः स्वस्वविमानसेवाभिः सम्पर्कं कृत्वा एतानि विमानयानानि प्राप्तुं शक्नुवन्ति इति। कस्यापि प्रश्नस्य चिन्तायाः च कृते यु. ए. ई. इत्यत्र स्थिताः भारतीयाः नागरिकाः अविराम् सहायता-सेवया सह सम्पर्कं कर्तुं शक्नुवन्ति। **वॉट्सऐप संख्या अस्ति** *अष्ट, शून्यं, शून्यं, चत्वारि, षट्, त्रीणि, चत्वारि, द्वे* **टोल् फ्री सङ्ख्या** *धन, नव, सप्त, एकं, पञ्च, चत्वारि, त्रीणि, शून्यं, नव, शून्यं, पञ्च, सप्त, एकं* इति ।

## पश्चिम-एशियादेशे द्वन्द्वः

पश्चिम-एशियादेशे द्वन्द्वः इतोऽपि तीव्रः अभवत् यतः इरान्-देशः संयुक्त-यू. एस्.-इस्रेल्-सैनिकानां आक्रमणानां मध्ये "आपरेशन् ट्रू प्रामिस् 4" इत्यस्य ऊनविंशतितमं चरणं प्रारब्धम्। अद्य इस्रेल्-देशस्य रक्षाबलेन उक्तं यत् इरान्-देशात् नैकानि प्रक्षेपास्त्राणि प्रक्षेपितानि इति। मध्य-इस्रेल्-देशे, येरूसलम्-क्षेत्रे, वेस्ट्-बैङ्क् इत्यस्य केषुचित् भागेषु च समुदायेषु आपत् सूचना-यन्त्राणि सक्रियानि। यदि इस्रेल्-अमेरिकादेशौ इरानस्य शासनं पातयितुं प्रयतेते तर्हि इस्रायेल्-देशस्य डिमोना-परमाणु-स्थलम् लक्ष्यीक्रियते इति इरान्-देशेन सञ्चेतितम्। इरान्-देशात् आक्रमणानां मध्ये, कतर्-देशः अवदत् यत् सम्बद्ध-अधिकारिणः अस्थायी-निवारक-उपायरूपेण U.S. दूतावासस्य समीपस्थान् निवासिनः निष्कासयन्तः सन्ति इति। साऊदी

अरब- देशेनापि उक्तं यत् तस्य वायु-रक्षा-व्यवस्थया नैकानि ड्रोन्स् यन्त्राणि अवरोधितानि, नष्टानि च कृतानि। यु. ए. ई.-देशस्य रक्षामन्त्रालयः अपि उद्घोषयत् यत् तस्य वायु-रक्षा-प्रणाल्या बैलेस्टिक्- प्रक्षेपास्त्राणि सफलतया अवरोधितानि। अपरपक्षे, इस्रेल्-देशः अपि इरान्-देशस्य उपरि नूतनम् आक्रमणं प्रारब्धवान्। इस्रेल्-देशस्य वायुदलेन इरान्-देशस्य काम्-क्षेत्रे इस्रेल्-देशं प्रति प्रक्षेपणाय सज्जं सशस्त्रं ब्यालिस्टिक्-क्षेपणास्त्राणि-प्रक्षेपकं आक्रम्य नष्टम् अकरोत्। एतदतिरिच्य, इस्फ़हान्-नगरे वायुदलेन विमानेन प्रहारं कर्तुं निर्मितः रक्षा-तन्त्रोपि नष्टः अभवत्। अत्रान्तरे, तेहरान्-नगरस्य ग्रैण्ड-मोसल्लानगरे अमेरिका-इस्रेल्-संयुक्त-आक्रमणे मृतस्य इरान्-देशस्य सर्वोच्च-नेतुः अली-खामेनीई इत्यस्य पार्थिवशरीरस्य स्थापनार्थं सज्जता प्रचलन्ति। अपि च, चीनदेशस्य विदेशमन्त्रिणा वांग् यी इत्यनेन पश्चिम-एशियायाः वर्तमान-स्थित्यां यु. ए. ई. तथा साउदी-अरब-देशयोः स्वप्रतिपक्षैः सह वार्तालापं कृतवान्।

## आई. सी. सी टी-20

आई. सी. सी पुरुषाणां टी-20 विश्वकप्-स्पर्धामालिकायां अद्य सायङ्काले मुम्बई-नगरस्य वानखेडे-क्रीडाङ्गणे द्वितीय-उपान्त्यस्पर्धायां भारतं इङ्ग्लैण्ड्-देशेन सह स्पर्धिष्यते । क्रीडा सायं सप्तवादने आरप्स्यते। अद्यतन स्पर्धायाः विजेता रविवासरे अहमदाबाद्-नगरस्य नरेन्द्रमोदी-क्रीडाङ्गणे अन्तिमस्पर्धायां न्यूज़ीलैण्ड्-देशेन सह स्पर्धिष्यते ।